न्वादेशे द्वितीयाटौस्स्वेनः ॥ नद्वाव कथ्यः ॥ एनं ॥ एनौ ॥ एनान् ॥ एनेन ॥ एनयोः २ ॥ किंचि
त्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः ॥ यथाऽनेन व्या
करणमधीतमेनं छन्दोध्यापय ॥ नोपधायाः ॥ नाम्नो नो लोपः शौ ॥ राजा ॥ राजानौ ॥ राजा
नः ॥ हे राजन् ॥ राजानं ॥ राजानौ ॥ अल्लोपोऽनः ॥ राज्ञः ॥ राज्ञा ॥ राजभ्यां ॥ नस्य लोपः स्थानिवद्विभक्तिका
र्ये पंचस्वेवेति ज्ञापकात् ॥ राजभिः ॥ राजनि ॥ राज्ञि ॥ राजसु ॥ एवं वृषादयः ॥ पञ्चनः ॥ पञ्चना
आत्मनः ॥ आत्मना ॥ सुधर्मणः ॥ सुधर्मणा ॥ प्रतिदिवा ॥ प्रतिदिवानौ ॥ अल्लोपे रुतौ ॥ द्यौ

द्वितीयाचटौस्वनेऽन्वते द्वितीयाटौसः तेषु ६

अनूपंचमुर

१९

इस्तवृद्धौ० पी० १

श्वयुवे अनयोः समाहारः द्वितस्मिन् १

॥ ननु ऋधातो र्विप्रत्यये गुणे च अरिति रूपं तस्मान्मतुप्रत्यये अर्वतेत्यादि ऋधातोरेव वनिप्प्रत्यये अर्वेति रूपं शब्दस्त्वायं वाजिवाहार्वगंधर्वहयसैंधवसप्तय इत्यमरोक्तत्वादर्थोपि न भिद्यते किमनेन सूत्रेणेति चेदुच्यते तत्र तावत् सर्वप्रयोगे प्राप्ते सौ परे न नुपदेचनं तस्य प्रयोगो भवति इति अर्वणस्त्रार्थं सूत्रम् ५

र्विहसे ॥ धातोरिरुतोर्दीर्घो भवति रेफवकारयोर्हसपरयोः परतः पदान्ते च । प्रतिदीव्नः । प्रतिदीव्ना । प्रतिदिवभ्यां । प्रतिदिवभिः ॥ श्वन्युवन्मघवन्शब्दानां पंचसु राजन्शब्दवत् प्रक्रिया ॥ श्वादेः ॥ श्वादेर्वकारस्य उत्वं प्राप्नोति शसादौ स्वरे ईपीकारे च । शुनः शुना ॥ श्वभ्यां । यूनः । यूना । युवभ्यां । मघवा । मघवानौ । मघवानः । मघवानं । मघवानौ । मघोनः । मघोना ॥ अर्वणस्त्रसावनञः ॥ नञा रहितस्यार्वन्नित्यस्य तृ इत्ययमादेशः स्यान्न तु सौ । अर्वा ॥ ऋदितो नुम् ॥ उकारानुबंधस्य ऋकारानुबंधस्य च नुमागमो भवति पुंसि पंचसु । हे अर्वन् । अर्वंतौ । अर्वंतः । अर्वंतं । अर्वतो । अर्वतः । अर्वता । अर्वद्भ्यां । अर्वत्सु । अनञः किं । अनर्वा । अनर्वाणौ । असौ किं । अर्वा । इतोत्पंचसु । पथिन्मथिन्ऋभुक्षिन्शब्दानामिकारस्याकारादेशो भवति पुंसि पंचसु शौ च ॥ थो न्थ् ॥ पथिमथोस्थस्य न्थ् स्यात् । पुंसि पंचसु शौ च ॥ आ सौ ॥ पथिमथिऋभुक्षां टेरात्वं भवति सौ । पंथाः । पंथानौ । पंथानः । हे पंथाः । पंथानं । पथानौ । पथांटेः ॥ पथिमथिऋभुक्षां टेर्लोपो भवति । शसादौ स्वरे ईपीकारे च

ऋदितो नुम् अनयोः समाहारः द्वितस्य ८

ऋभुक्षः स्वर्गवज्रयोस्तोः स्वार्थे इन्प्रत्यये ऋभुक्षिन् ४

पाति स्त्रल्लोपः स्वरे इस
कारस्य लोपे कृते पुंसि
पुंः एवं प्रामाण्यसिद्धं व
हिरंगमंतरंगे इति प
रिभाषया नशासिनि
मित्तकत्वेन वहिरंग
स्याल्लोपस्याः सिद्धः
त्वात् पूर्वपूर्वमंतरं
गमिति स्वीकारात्

पथः पथा। पथिषु। एवं मंथा ऋभुक्षाः। स्त्रियां नांतत्वादीप्। सुपथी। सुमथी। ऋभुक्षी
इः॥ क्लीबे सुपथि वनं। औ। नपुंसकानां नस्य लोपो वा। हे सुपथिन्। हे सुपथि। सुपथी। सु
पंथानि॥ इन्हन्पूषार्यम्णां शौ सौ॥ इन् हन् पूषन् अर्यमन् इत्येतेषां शौ सौ च आद्योपधाया दीर्घो भ
वति नान्यत्र। दंडी। हे दंडिन्। दंडिनौ। दंडिनः॥ एवं मुशलिन् यशस्विन् वाग्मिन् प्रमत
पः। वृत्रहा। वृत्रहणौ॥ हनो घ्नः॥ हंतेर्हकारस्य घः स्यान्नकारे ञिति णिति च परे। घसंयो
गेणत्वं न। वृत्रघ्नः। वृत्रघ्ना। वृत्रहभ्यां। वेद्यो। वृत्रहणि। वृत्रघ्नि। एवं पूषन् अर्यमन्
संख्याशब्दाः पंचन् प्रभृतयो बहुवचनांतास्त्रिषु सरूपाः। जस्शसोर्लुक्। षकार
नकारांतसंख्यायाः परयोर्जस्शसोर्लुग्भवति। पंच २। पंचभिः। पंचभ्यः॥ ष्णः॥ षका
रनकारांतसंख्यायाः परस्यामो नुट्। पंचानां। परमपंचानां। गौणत्वे न लुक्नुटौ।
प्रियपंचानौ। प्रियपंचानः। प्रियपञ्च्नः। प्रियपंचभ्यां। प्रियपञ्च्नो। प्रियपञ्च्नि वें
उक्तेः प्रियपंचनि। एवं सप्तन् नवन् दशन् प्रभृतयः॥ अष्टन आ ड्डौ वा॥ अष्टन शब्दस्य ८

ऋभुक्षं पंथाः सत्त्वां तात् सुपथी
रण्याः ९ नविद्यते ऋभु
क्षाः ईड्यो यस्यासा अन्त्यु
क्षीपूः ९ पथ्यांदेः ९

णत्वादौ स्वरे परे नकार
वपमध्ये चकारः २

कृतात्मकारांतः अष्टन् शब्दो हाहावत् २८

स्वरयोर्जस्शसोर्वृद्धिर्भवति। अष्टौ२। अष्ट२॥ वाष्टु॥ अष्टनः सकारभकारादिषु विभक्तिषु
वा आत्वं स्यात्। अष्टभिः। अष्टाभिः। अष्टभ्यः। अष्टाभ्यः। अष्टानां। अष्टसु। अष्टासु। प्रियाष्टा
प्रियाष्टानौ। प्रियाष्टानः। प्रियाष्नः। प्रियाष्ना॥ अल्लोपस्य बहिरंगत्वेनासिद्धत्वान्न ष्टुत्वं
प्रियाष्टाभ्यां। प्रियाष्नोः। राजवत्सर्वं हाहावच्चोपरं हसे। सुगण्। सुगणौ। सुगण्भ्यां। सुग
ण्सु। सुगण्ट्सु। सुगण्सु। हे सुगण्। भुत्। भुद्। बुधौ। बुधः। भुद्भ्यां। भुत्सु। राग्। राक्॥
राघौ। राघः। राग्भ्यां। राक्षु॥ सुककुप्। सुककुब्। सुककुभौ। सुककुप्सु॥ युजेः पंचसु
असमासे ई इति च॥ दिशां॥ दिश् दृश् स्पृश् दधृष् स्रक् ऋत्विज् क्रुंच युज् स्रज् स्वनच्
उष्णिहादीनां कुत्वं भवति स्यादौ रसे पदांते च। युङ्। युंजौ। युंजः। युंजं। युंजौ। युजः।
युजा। युग्भ्यां। युक्षु॥ चोः कुः॥ चवर्गस्य कवर्गो भवति धातोर्झसे परे नाम्नश्च रसे पदां
ते च। समासे तु सुयुक्। सुयुग्। सुयुग्भ्यां। (समाधिचित्तवृत्तिनिरोधः) समाधार्थस्य नुम् न। युक्। युग्। खन्। खञ्जौ। खं
जः। खञ्भ्यां। खन्सु॥ छशषराजादेः षः॥ सम्राट्। सम्राड्। सम्राजौ। सम्राजः। देवेट्॥

एवं सुगाण् सुगाणौ सुगाण्ट्सु सुगाण्सु ५८

शोभना: ककुभः दिशो यस्मिन्काले स काल: सुककुप् ६८

पुंसि२ योजे ६ पुंजसमाधौ देवादिकः आ त्मनेपदी ६

विश्वं सृजतीति विश्वसृट् क्विवृंतः दिशामिति कुत्वं न सृजि दिशोरिति सूत्रे रज्जुसृभ्यामिति भाष्यप्रयोगात् सृजियजोः कुत्वापवादः षत्वविधिरेव स्यात् त्विक्शब्दस्योक्तु दिशामित्यनेन कुत्वमेव २ विश्वं वसुर्यस्य सः । विश्वं राजतीति २

देवेड् । देवेजौ । परम[illegible]ट् । परमड् । परमजौ । विश्वसृट् । विश्वसृड् । विश्वसृजौ । विश्वसृ
जः । विश्वसृड्भ्यां । विश्वस्य वसुराटोर्दीर्घः । विश्वावसुः भानुशब्दवत् । विश्वाराट् । विश्वा
राड् । विश्वाराजौ । विश्वाराजः । विश्वाराड्भ्यां । विश्वाराट्सु । विश्वाराट्त्सु । स्कोः संयोगाद्योः
॥ संयोगाद्योः सकारककारयोर्लोपः स्यात् । धातोर्झसे परे नाम्नश्च रसे पदान्ते च । भ्रस्
ज्जो जः । भृट् । भृड् । भृज्जौ । भृज्जः । वृट् । वृड् । [illegible] । इहौ । [illegible] । वृश्चौ । वृश्चौ । विश्चाट् । वि
श्चाड् । विश्चाजौ । ऋत्विक् । ऋत्विग् । ऋत्विजौ । ऋत्विजः । ऋत्विक्षु । ऊर्क् । ऊर्ग् । ऊर्जौ ।
परमश्चासौ स च परमसः
ऊर्क्षु ॥ तः ॥ त्यदादेस्तस्य सत्वं स्यात् सौ परे ॥ स्यः । त्यौ । त्ये । सः । तौ । ते । परमसः । परम
तौ । परमते । संज्ञायां गौणत्वे चात्वसत्वे न । त्यद् । त्यदौ । अतित्यद् । अतित्यदौ । पः । यो
ये । एषः । एतौ । एते । एतं । एतौ । एतान् । अन्वादेशे । एनं । एनौ । एनान् । एनेन । एनयोः । अ
ग्निमत् । अग्निमद् । अग्निमतौ । अग्निमद्भ्यां । अग्निमत्सु । प्रत्यं चतीति क्विपि कृते ॥ नो
लोपः ॥ धातोर्हसांतस्योपधाभूतस्य नकारस्य लोपः । क्वि ति परे पूजार्थां चतेर्न ॥

अप्रस्येति सकारजका
रसंयोगं विनापि भव
ति तत्र सकारस्यजका
रः ५
ऋतौ यजतीति ऋत्वाबुप
ददयजेः यजेः क्विपृप्रत्य
दित्वात्संप्रसारणं ६
विश्वाड्भ्यां विश्वाट्
सु विश्वाट्त्सु विश्वा
ट्सु ६८

वावसाने स्यान वा स्यां
त्तु लक्षणानीदं ताः २८

सचकच स्कोर्तयोः ३

अप्रतुसंयोगांतस्य लोपः
कथं न तत्रितस्यरात्रे ६
ऊर्जी बलप्राणनेऽस्मा
च्चु पदे र्दिः क्विपितु
लोपः ऊर्जं यतीति
ऊर्क् २ ६८ चौः कुः
गोलोत्वमतिक्रांतोऽति
त्यद् ४

२१

निर्गतः उपपदेभ्यः नि
रुपपदः तस्मात् उपप
द रहितस्य क्रुंचे रुपधा
न्तस्य नलोपो न
क्विपि १८

निरुपपदात् । क्रुंचेः क्विप् न । क्रुंच कौटिल्याल्पीभावयोः । अंचेः पंचसु पुंसि नुम् । दिशां ॥
प्रत्यङ् । प्रत्यंचौ प्रत्यंचः । प्रत्यंचं । प्रत्यंचौ । अंचेर्दीर्घश्च । नलोपि नोंचतेरकारस्य लोपः
स्यात् पूर्वस्य च दीर्घः । शसादौ स्वरे तद्धितयस्वरयोरीपीकारे च । प्रतीचः । प्रतीचा । प्रत्यग्
भ्यां । प्रत्यक्षु । क्रुङ् । क्रुंचौ क्रुंचः ॥ क्रुङ्भ्यां । क्रुङ्क्षु । क्रुङ्षु । शसेह्नोः । शसेचपस्य क्रुङ्
क्षु । सोपपदेतु । निक्रुग् । निक्रुक् । निक्रुचौ । निक्रुचः । तिर्यङ् । तिर्यंचौ । तिर्यंचः । तिर्यं
चं । तिर्यंचौ । तिरश्चादयः । तिरश्चादयो निपात्यंते शसादौ स्वरे तद्धितयस्वरयोरीपीक
रे च । पूजायां तु न । तिरश्चः । तिरश्चा । तिर्यग्भ्यां । तिर्यक्षु । उदङ् । उदंचौ । उदीचः । उदी
चा । उदक्षु । पितरमंचतीति । पित्र्यङ् । पित्र्यंचौ । ऋतो दीर्घो वा । पितृचः । पितॄचः । पितृचा । पि (शसादौ स्वरे ई)
तॄचा । पित्र्यग्भ्यां । पित्र्यक्षु । सध्र्यङ् । सध्रीचः । सम्यङ् । समीचः । समीचा । प्राङ् । प्राचः । प्राचा । पू
जायां तु । प्रत्यङ् । प्रत्यंचः । प्रत्यङ्भ्यां । प्रत्यङ्क्षु । प्रत्यङ्क्षु । प्रत्यङ्षु । उदंचः । तिर्यङ् । सम्यंचः
सम्यंचा । सध्र्यंचः । प्रांचः । अमुमंचतीति । अमुमुयङ् । अमुमुयंचौ । अमुमुईचः । अमुमुईचा

विषग्देवयोश्चाटेरद्र्यंचतौ वप्रत्यये चकारादद सशब्दस्य ग्रहणं अदद्रि अंचइति स्थिते यत्वे कृत्वे अदसो सेर्दादु दो मः १८
विष्वग्देवयोस्सर्वनाम्नश्चाटेरद्र्यंचतावप्रत्यये ॥ अनयोः सर्वादेश्चाटेरद्र्यादेशो भवति प्रत्ययांते अंचतौ परे ॥ परतः केचिदिच्छं
ति केचिदिच्छंति पूर्ववत् उभयोः केचिदिच्छंति केचिदिच्छंति नोभयोः १

मुत्वस्यासिद्धत्वान्नवत्वं अंत्यबाधेऽअंत्यसदेश स्येति पक्षे भावात् एवं तां मते परस्य दकार

सि० चं०

इकारस्यैव मुत्वं कुर्वतो लत्वं स्यनेनयथा लत्वंत २२ ओ स्थ :३=

उगितो नुम् नपधाया दीर्घः इह दीर्घकर्त्तव्येऽनयोगीतस्य लोपस्यासिद्धत्वं न कश्चिदन्यदेवेत्युक्तत्वात् हविजेक्षितिनिः संकोम श्येषु मघवान् साविति भा इ:४

वस निवासे ऽऽच्छादनार्थे ३

अः अकारः सेः सकारस्य स्थाने यस्य सो ऽसि तस्मात् सेः त्यदाद्यत्वविशिष्टस्याद्सो हि मुत्वं दृश्यते इति केचित् तद् इति तन्मते उभयोर्मुत्वं न त्यदाद्यत्वाभावात् एवं चामुमुङ् इति केचिदुदाहरंति तद्भाष्ये ऽनुक्तत्वादुपेक्ष्यमिति भावः ३= असेरिति इकारनिर्द्देशा र्थः असकारांतस्याद्सो दात्परस्य ए ईत्वं ऊत्वं तः ऊ इति ह्रस्वदीर्घयोः समाहारः ह्रस्वव्यंजनयोः ह्रस्वो दीर्घस्य दीर्घः असांतस्येति किं अ मुनात्मन इच्छतीति अदस्यति दात्परस्येति किं अ मुयाः इत्यत्र बा तस्य प स्य मा ऽभूत् ३=

अमुमुयग्भ्यां । अदमुयङ् । अदमुईचः । अदमुग्भ्यां । अदद्र्यङ् । अदद्रीचः । पूजायां तु अमुमुयञ्चः । अमुमुयग्भ्यां । अदमुयंचः । अदमुयंचा । अदमुयग्भ्यां । अदद्र्यञ्चः । अदद्र्यग्भ्यां । अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छंति लत्ववत् । केचिदंत्यसदेशस्य नेत्येके सेर्हि दृश्यते ॥ महत् । महद् । महतौ । महतः । महद्भ्यां । महत्सु । उगितो नुम् ॥ न्सम्महतोर्धोर्दीर्घः शौ च । महान् । महांतौ । महांतः । महांतं । महांतौ । महतः । महता । महद्भ्यां । महद्भिः । हे महन् । द्वित्वकानां जक्षादीनां च शतुर्नुम् न शौ वा । ददत् । ददद् । ददतौ । ददतः ॥ एवं जक्षत् जाग्रत् दरिद्रत् चकासत् शासत् प्रभृतयः ॥ अत्वसोः सौ ॥ अत्वंतस्याधात्वसंतस्य चोपधाया दीर्घो भवति सावधौ परे । भवान् । भवंतौ । भवंतः । हे भवन् ॥ चंद्रमाः ॥ अधात्वसंतस्य किं । पिंडं ग्रसते पिंडग्रः । चीवराणि वस्ते सो चीवरवः । चीवरवसौ । चीवरवोभ्यां । चीवरवःसु । शत्रंतस्य त्वं त्वंतस्याभावान्नदीर्घः । भवन् । भवंतौ । भवंतः । हे भवन् । पचन् । पठन् । दीव्यन् । दीव्यंतौ । एवं धीमान् । धीमंतौ । धीमंतः । हे धीमन् । मघवान् । मघवंतौ । मघवद्भ्यां । गुप् । गुब् । गु

अदसोऽसांतस्य दात्परस्य वर्णस्य इदूतौ स्तो दस्य मश्च अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छंति लत्ववत् केचिदंत्यसदेशस्य नेत्येके ऽसेर्हि दृश्यते =३

मह पूजायां मह्यते पूज्यते इति महान् कर्म्मणि शतृप्रत्ययः ४

अतु अस अत्वसोस्तयोः ६

अत्र अदने भक्षणे वि षये ४

षौ। गुपः। गुब्भ्यां। तादृक्। तादृग्। तादृशौ। तादृशः। तादृक्षु। एवं यादृगादयः॥ नशेः। कौ वा
पदान्ते स्यादौ झसे च। नक्। नग्। नट्। नड्। नशौ। नशः। नग्भ्यां। नड्भ्यां। नक्षु। नट्सु। नट्त्सु।
विट्। विड्। विशौ। विशः। विट्सु। विट्त्सु। स्पृक्। स्पृग्। स्पृशौ। स्पृशः। घृतस्पृक्। घृतस्
पृग्। घृतस्पृशौ। उदकपूर्वस्य न कुत्वं। उदकस्पृट्। उदकस्पृड्। दधृग्। दधृक्। दधृषौ।
दधृषः। दधृक्षु। रत्नमुट्। रत्नमुड्। रत्नमुषौ। रत्नमुड्भ्यां। रत्नमुट्सु। रत्नमुट्त्सु। षष् शब्दो नि
त्यं बहुवचनान्तस्त्रिषु समरूपः। जश्शसोर्लुक्। षट्। षड्। षड्भिः। षड्भ्यः। रं॥ स्तः५ ष्णः॥ षो णो भ
वति नामिपरे। षण्णां। षट्सु। षट्त्सु। तदन्तस्यापीष्टः। परमषट्। परमषण्णां। गौणत्वे तु न
लुक् नुटौ। प्रियषट्। प्रियषषौ। प्रियषषः। प्रियषषां। दोषां॥ दोषादीनां रो भवति रसे
पदान्ते च। दोः। दोषौ। दोषः। शसादौ वा दोषन्। दोषः। दोष्णः। दोषा। दोष्णा। दोर्भ्यां। दोष
भ्यां। शासविसर्गनुम्स्थानिकानुस्वारव्यवधानेपि क्विलात्परस्य सस्य षः। दोःषु। दोष्षु
दोषसु। धोर्व्हिहसे। पिपठीः। पिपठिषौ। पिपठिषः। पिपठीर्भ्यां। पिपठीःषु। पिपठीष्षु

घृतं घृतेन वा स्पृशतीति॥ घृष्णोतीति दधृक् नि धृषा प्रागल्भ्ये अस्मात् क्विपि द्वित्वं निपातनात् र्ष

स्कोराद्योश्च १

सि० चं०

२३

त्वसगतो सुङ् पेसतीति
सुपीः ४

विविट् । विविड् । विवक्षौ । विवक्षः । तट् । तड् । तक्षौ । तक्षः । गोरट् । गोरड् । गोरक्षौ । गोरक्षः ।
स्कोराद्योश्चेति
तक्षिरक्ष्योः संयोगांतस्य लोपइत्येके । तक् । तग् । गोरक् । गोरग् । कलोपे कुत्वमसिद्धं । पि
पक् । पिपग् । पिपक्षौ । पिपक्षः । पिपक्षु । एवं विवक् । विवग् । विवक्षौ । दिधक् । दिधग् ।
दिधक्षौ । दिधक्षः । सुपीः । सुपिषौ । सुपिषः । सुपीःषु । सुपीष्षु । एवं सुतूः । विद्वान् । विद्वांसौ
विद्वांसः । विद्वांसं । विद्वांसौ । हे विद्वन् ॥ वसोर्वुः । वसोर्वकारस्य उत्वं भवति शसादौ
स्वरे परे तद्धितयस्वरमतुब्ङीपीकारे च । विदुषः । विदुषा । विद्वद्भ्यां । विद्वत्सु । सेदिवान् ।
सेदुषः । सेदुषा । वसोत्वे इड्भावः । सेदिवद्भ्यां ॥ ऊषिवान् । ऊषुषः । ऊषिवद्भ्यां । शुश्रु
वान् । श्रुधातोः । शुश्रुवुषः । शुश्रुवद्भ्यां ॥ अथ महच्छब्दसाहचर्याद्धातोरेव सनाव
ते । तेनेह । सुहिन् । सुहिंसौ । सुहिन्भ्यां । सुहिन्सु । ध्वत् । ध्वद् । ध्वसौ । ध्वद्भ्यां । ध्वत्सु । एवं
स्रत् । पुंसोःसुङ् । पुंसोःसुङादेशः । पंचसु पुंसि शौ च । पुमान् । पुमांसौ । पुमांसः । हे पुम
न् । पुंसः । पुंसा । पुंभ्यां । पुंसु । वेधाः । वेधसौ । हे वेधः । वेधोभ्यां । उशनसां ॥ उशनसः पुरुदंश

कुत्वस्यासिद्धत्वात्संयो
गांतस्य लोप इत्येके २

तुत्संवं डनेसुडुतोसती
तिसुतूः क्विबंतः ४

२३

पुरुवदृदशानीति पुरु
दंशाः इः नजिहनश
चेत्यश [illegible] अनेका
२ [illegible]

...पर्बी नहेः क्विप्त
हि॰ती तिपूर्वपदस्य
दीर्घः उपनह्यते तिर
दिवऔ दिवोनाम्नः औ
कारादेशो भवति सौपरे
३

स्यग्नेहसांसेरधेर्डाभवति। उशना। उशनसौ। उशनसः। उशनसो धौ नांतत्वा सांततास्य
संबोधने
दंततावा नक्तुमौः॥ हे उशनन्। हे उशनः। हे उशन। उशनोभ्यां। उशनस्सु। उशनःसु॥ सौ॰
सः॥ अदसो द्स्यसः सौ। सेरौ। अदसः सेरौ भवति। असौ। द्स्यमः। मादूः॥ अदसो मात्पर
स्य वर्णस्य उकारो भवति। ह्रस्वस्य ह्रस्वः दीर्घस्य दीर्घः॥ अमू। जसी। एरी बहुत्वे॥ अदस एका
रस्य ई भवति बहुत्वे। अमी। अमुं। अमू। अमून्। अमुना। अमूभ्यां। अमीभिः। अमुष्मै। अ
मूभ्यां। अमीभ्यः। अमुष्मात्। अमूभ्यां। अमीभ्यः। अमुष्य। अमुयोः। अमीषां। अमुष्मिन्।
अमुयोः। अमीषु॥ इति हसांताः पुल्लिंगाः॥ ६॥ नहो धः॥ नहो हकारस्य धो भव॰
ति धातोर्झसे परे नाम्नश्च रसे पदांते च। उपानत्। उपानद्। उपानहौ। उपानहः। उपान
दिशा
ह्यां। उपानत्सु। उष्णिक्। उष्णिग्। उष्णिहौ। उष्णिग्भ्यां। द्यौः। दिवौ। दिवः। उरसे। द्युभ्यां। द्यु
निर्संधक नवतांतः
षु। गीः। गिरौ। गिरः। गीर्भ्यां। गीर्षु। एवं पुरःकरादयः॥ चतस्रः। प्रियचत्वाः। प्रियचत्वारौ॥
हे प्रियचत्वः॥ इयं स्त्रियां। इदमः स्त्रियामियं सौ। इयं। इमे। इमाः। इमां। इमे। अनया। आ॰

वाभ्यां। द्यां दिवं दिवौ
दिवः हे द्यौः सुपुर

सृजे क्विप् आमाग मश्च निपातितः २

सि० चं०

२६

भ्यां। अस्यै। अस्याः। अनयोः। आसां। अस्यां। अनयोः। आसु। अन्वादेशे एनां। एने। एनाः।
एनया। एनयोः २। त्विक्। त्वग्। त्वजौ। त्वग्भ्यां। त्वक्षु। समित्। समिद्। समिधौ। समिद्भ्यां।
समित्सु॥ स्यात्ये त्याः। एवं तद् यद् एतद् किम्। वाक्। वाग्। वाचौ। वाचः। स्रक्। स्रग्।
स्रजौ। अप्शब्दो नित्यं बहुवचनांतः। आपः। अपः। भिदपां। अप्शब्दस्य दत्वं भव
ति। भादौ विभक्तौ। अद्भिः। अद्भ्यः २। अपां। अप्सु। दिक्। दिग्। दिशौ। दिशः। दिग्भ्यां।
दिक्षु। त्विट्। त्विड्। त्विषौ। त्विषः। त्विड्भ्यां। त्विड्भ्यः। त्विट्सु। दृक्। दृग्। दृशौ। सहजुष
त इति। सजूः। सजुषौ। सजुषः। सजूर्भ्यां। सजूःषु। सजूष्षु। आशीः। आशिषौ। आशीर्
भ्यां। आशीःषु। आशीष्षु। असौ। अमू। अमूः। अमूं। अमू। अमूः। अमुया। अमूभ्यां।
अमूभिः। अमुष्यै। अमूभ्यां। अमूभ्यः। अमुष्याः। अमुयोः। अमूषां। अमुष्यां। अमुयो
ः। अमूषु॥ [२५] इति हलंताः स्त्रीलिंगाः॥ स्वनडुत्। स्वनडुही। स्वनड्वांहि २। पुनस्तद्वत्
शेषं पुंवत्। वाः। वारी। वारि २। वार्भ्यां। वार्षु। ग्रसे। विमलद्युः। विमलदिवी। विमल

वाग्भ्यां वाक्षु ककुप्। ककुब्। ककुभौ। ककुब्भ्यां। ककुप्सु इत्यादि। त्वक्। त्वग्। त्वचौ। त्वग्भ्यां। त्वक्षु ३

२६

चत्वारि श्रोम श्रोमनी श्रोमानि १

स्यमोर्लुक्कृते नपुं
सकात्स्यदाद्योनां टेर
त्वं न १
धौ नपुंसकानां नल
लोपो न ३

द्विवि। किं के कानि २ इदं इमे इमानि। अन्वादेशे एनत् एनद् त्यदादीनां यमोर्लु॰
कि कृते टेरत्वं न भवति स्यादौ इति निर्देशात्। द्विवचनादौ तु भवति एने एनानि ब्र
ह्म ब्रह्मणी ब्रह्माणि २ हे ब्रह्मन् हे ब्रह्म॥ अन्हः॥ अहन्शब्दस्य सो भवति रसे पदां
ते च॥ अहः अन्ही अहनी अहानि २ अन्हा अहोभ्यां। कर्म कर्मणी कर्माणि
२ एवं चर्म नर्म वर्म धन्वनादयः॥ दंडि दंडिनी दंडीनि २ स्रग्वि स्रग्विणी स्रग्वी
णि २ वाग्मि वाग्मिनी वाग्मीनि २ बहुवृत्रह बहुवृत्रघ्नी बहुवृत्रहणी बहुवृत्रहा
णि २ बहुपूष बहुपूष्णी बहुपूषणी बहुपूषाणि २ बह्वर्यम बह्वर्यमणी बह्वर्यम
णी बह्वर्यमाणि २ असृक् असृग् असृजी असृंजि २ शासादौ वा असन् असा
नि असजा अस्ना असभ्यां असभ्यां असृक्षु। ऊर्क् ऊर्ग् ऊर्जी ऊंर्जि बहूर्जो नुम
प्रतिषेधः। अंत्यात्पूर्वो वा नुम् बहूर्जि बहूर्ञ्जि त्यत् त्यद् त्ये त्यानि तत् तद् ते ता॰
नि यत् यद् ये यानि एतत् एतद् एते एतानि अन्वादेशे एनत् एनद् एने एनानि वे

बहवः पूषणः स्वर्यमे
स्मिन् तत्कुलं १

बहवो वृत्रणो यस्मि
न् तत् ६ बहवो र्य
मणः पितरो यस्तत
कुलं १

षष्ठ्यन्तं ... संयुक्तेत्यस्य सूत्रस्य श्लोकस्य व्याख्याने
सि० चं०
द्वितीयस्य व्याख्यानीये च नुम् १
२५
विंशत्याद्याः तद्वैकत्वे संख्यासंख्येयसंख्याने ... त्वादेकत्वम् ३

भित्। बेभिद्। बेभिदौ। बेभिदि। सर्वत्र तस्य शो नुम्। चेछित्। चेछिद्। चेछिदौ। चेछि
दि। गवाक् शब्दस्य रूपाणि क्लीबे अर्चा गतिभेदतः॥ असंध्यागमात्रोपैर्न बाधिक
शतं मतं॥ स्वमसुप्सु नव षड्भ्यादौ षट्के सुस्त्री लिंज शसोः॥ चत्वारि शेषे दशाके
रूपाणीति विभावय॥ गवाक्। गवाग्। गोअक्। गोअग्। गोक्। गोग्। गवाङ्।
गोअङ्। गोङ्। गोची। गवाञ्ची। गोञ्ची। गवाञ्चि। गोअञ्चि। गोञ्चि। तिर्यक्। तिर्यग्।
तिरश्ची। तिर्यञ्चि। तिर्यङ्। तिर्यञ्ची। तिर्यञ्चि। यकृत्। यकृती। यकृंति। यकानि। य
क्रा। यकृता। यकभ्यां। यकृद्भ्यां। शकृत्। शकृती। शकृंति। शकानि। शक्रा। शकृता
शकृद्भ्यां। शकभ्यां। ददत्। ददद्। ददती। ददंति। ददति। एवं जक्षादयः। तुद
त्॥ वादीपो शातुः॥ अवर्णान्तात्परस्य शतुर्नुम् [illegible] ीकारे ईपि च परे। तुदंती। तुद
ती। तुदंति। भात्। भांती। भाती। भांति॥ आप्योर्नित्यं॥ अपूप्रत्यय प्रत्ययसंबंधि
नो अवर्णात्परस्य शतुर्नुम् नित्यमीकारे ईपि च। पचत्। पचंती। पचंति। दीव्यत्॥

... संख्या ... ऽसंध्या गमात्रोपाद्यैः २
गतिपूजनयोस्त्रिरूप ... त् ५
यकृतः कालखंड ... ६
ददत् इति पुल्लिंगे ... एवं द्विरुक्तानां यक्षा दीनां चेति वा नुम् ४

२५

सुहृस्रोतोपसिन्नास्थि
तत्स्वपू १

सार

अर्चिर्हृवपियजितनि
धनितपिस्यसुसिलौदि
कधनेरुस् धनुः ३

नवकेपूर्वकोरु
सुपुमांसोपक्षिन तत ५

दीव्यंती । दीव्यंति । स्वप् । स्वब् । स्वपी ॥ स्वम्महतोधात्विति दीर्घः शौ च । स्वांपि । दीर्घो नि से
के । स्वपि । स्वपा । भिदर्पां । स्वब्भ्यां । स्वब्भिः । जगत् । जगद् । जगती । जगंति । महत् । महद् । म
हती । महांति । धनुः । धनुषी । न्वपूर्वस्य शौ दीर्घः । धनूंषि । हविः । हविषी । हवींषि । प
यः । पयसी । पयांसि । तेजः । तेजसी । तेजांसि । वचः । वचसी । वचांसि । पिपठीः । पिपठि
षी । सयङ्कतस्य शौ नुम् न । पिपठिषि । सुपुम् । सुपुंसी । सुपुमांसि । अदः । अमू । अमूनि ॥ इ
ति हसांतानपुंसकलिंगाः ॥ त्वमहं सिना ॥ सि सहितयोर्युष्मदस्मदोस्त्वमहमि
त्येतावादेशौ भवतः । यथासंख्येन ॥ त्वं । अहं । युवावौ द्विवचने ॥ द्व्यर्थवाचिनोः यु
ष्मदस्मदोर्युव आवा आदेशौ भवतः । स्यादौ विभक्तौ । विभक्तौ किं । युष्मत्पुत्रः । आमौ ॥
युष्मदस्मद्भ्यां परस्यौ औ आम् भवति । युवां । आवां । यूयं वयं जसा ॥ जसा सहितयोर्युष्म
दस्मदोर्यूयं वयं भवतः । यूयं । वयं ॥ त्वमावेकत्वे ॥ युष्मदस्मदोस्त्वमौ भवतः ए
कत्वे गम्यमाने ॥ आम्नौ ॥ युष्मदस्मदोष्टाया त्वं भवतः सिमिसकारे भिसि च परे । त्वाम्

अर्चिर्शुचिहुसृपीत्यादिना
जुहोतेरस् ३
पिपठिष्योः क्विप्यपोरिति
दीर्घः ४
किंच द्विवचने इति प्रत्यय
विशेषको कृते पि युवावौ
सिद्धतः तथापि युवाम
मिति कांतान् अति युवाभि
त्यत्र युवावयोरप्रसंगाय
णाय ग्रहणः विशेषणं
कृतं ७
अत्र विपरीत निर्देशात् सु
डामइति सुटन प्रवर्त्तते ४
द्वयोरर्थोर्सर्थः द्व्यर्थकं
इति द्व्यर्थवाचिनौ तयोः ७

सि० चं०

२६

माम । युवाम । आवाम् । त्वदाद्यत्वे शसीति दीर्घः । शसो नो वक्तव्यः । युष्मान् । अस्मान् ।
त्वन्मदादेशे कृते । एटाङ्योः । युष्मदस्मदोष्टेरेत्वं भवति टाङ्योः । त्वया । मया । युवाभ्यां
आवाभ्यां । युष्माभिः । अस्माभिः ॥ तुभ्यं मह्यं ङया ॥ ङेसहितयोर्युष्मदस्मदोस्तुभ्यं मह्यं ए-
तौ भवतः । तुभ्यं । मह्यं । भ्यसभ्यं । युष्मदस्मद्भ्यां परो भ्यस अभ्यं भवति । शकारो भकारादि-
निवृत्तयथः सन्निधिकरणात्
त्वव्यावृत्त्यर्थः । युष्मभ्यं । अस्मभ्यं । ङसिभ्यसोः शतुः । ङसिसाहचर्यात्पंचम्या एव भ्यस-
ग्रहणे । त्वत् । मत् । युवाभ्यां । आवाभ्यां । युष्मत् । अस्मत् । तवमम ङसा । ङसासहितयो-
र्युष्मदस्मदोस्तवममौ भवतः । तव । मम । युवयोः । आवयोः । सुडामः । सामाकं । युष्मद-
स्मद्भ्यां परः साम् आकं भवति । युष्माकं । अस्माकं । त्वयि । मयि । युवयोः । आवयोः । यु-
ष्मासु । अस्मासु । समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी ॥ समासार्थोऽन्यसंख्यश्चेद्यु-
वावौ त्वन्मदावपि ॥१॥ सिजसङेङस्सुपरतः आदेशाः स्युः सदैव ते । त्वाहौ सू यवयौ
तुभ्यमह्यौ तवममावपि ॥२॥ एते परत्वाद्बाधंते युवावौ विषये स्वके । त्वन्मदावपि ।

तदंते परमहं सौ तत्वे तुभ्यति तुभ्यं अतिमह्यं ४

तदंते परमतव परमम सौ तत्वे अतितव अतिमम ७

समस्येते इति समस्यमाने समासविषयी क्रियमाणे द्वौ च एकश्च द्व्येकौ द्व्येकयोर्भावः द्व्येकत्वं द्व्येकत्वं वक्तु इति द्व्येकत्ववाचिनी तः ८

समासस्यार्थो विग्रहः अन्यसंख्यो अन्यस्याः अन्यपदार्थस्य संख्या यस्मिन् अन्यसंख्यो युष्मदस्मदर्थगत संख्येतर संख्यायुक्तो भव २१ तीत्यर्थः ३

त्वके निजविषये आत्मीये स्थाने १

॥ पुनर्गौरिति रूपांतरं युष्मानस्मान् वा करोति युष्मयति अस्मयति ततः क्विपि अ इति णिलोपे कृते युष्म अस्मेति जातं स्यादिषु युष्मे अस्मो इति
त्वमहमादय आदेशा भवंति एकदेशविकृतमनन्यवदिति उक्तत्वात् त्वं अहं औ विभक्त्यादिषु णो ण त्वेपि एवं त्रात्वे कृते टाङिः ओस
विभक्तीन् वर्जयित्वा आत्वं युवां आवां यूयं वयं २ युवां आवां युवान् अस्मान् २ एटाङ्योरिति यत्वं त्वया ... एतस्य पत्वं युष्मा
अस्या युवाभ्यां आवाभ्यां युष्माभिः अस्माभिः तुभ्यं मह्यं युवाभ्यां आवाभ्यां युष्मभ्यं अस्मभ्यं युष्मत् अस्मत् युवाभ्यां आवाभ्यां युष्मत्
अस्मत् तव मम अस्य स्य पत्वे युष्मोः अस्मोः युष्माकं अस्माकं पत्वे युष्मि अस्मि युष्मोः अस्मोः युष्मासु अस्मासु =

स्वतः इत्य त्रसमन्यर्थे तत्

बाध्यते पूर्वं बहिर्विषयत्वात् ॥ ३ ॥ द्व्येकसंख्यः समासार्थो बह्वर्थे युष्मदस्मदी । तयोर्द्व्येकतार्थत्वात् युवावौ त्वमदौ न च ॥ ४ ॥ त्वां मां वा अतिक्रांत इति विग्रहे अतित्वं अत्यहं मोणत्वेऽपि युष्मदस्मदोस्त्वदाद्यत्वं भवति । अतित्वां । अतिमां । अतियूयं । अतिवयं ॥ अतित्वां । अतिमां । अतित्वान् । अतिमान् । अतित्वया । अतिमया । अतित्वाभ्यां । अतिमाभ्यां । अतित्वाभिः । अतिमाभिः । अतितुभ्यं । अतिमह्यं । अतित्वाभ्यां । अतिमाभ्यां । अतित्वभ्यं । अतिमभ्यं । अतित्वत् । अतिमत् । अतित्वाभ्यां । अतिमाभ्यां । अतित्वत् । अतिमत् । अतितव । अतिमम । अतित्वयोः । अतिमयोः । अतित्वाकं । अतिमाकं । अतित्वयि । अतिमयि । अतित्वयोः । अतिमयोः । अतित्वासु । अतिमासु । युवां आवां वा अतिक्रांत इति विग्रहे सिजसङेङस्सु प्राग्वत् । अन्यत्र युवावौ युष्मान् अस्मान् वा अतिक्रांत इति विग्रहे सिजसङेङस्सु प्राग्वत् । अन्यत्र अतियुष्मां । अत्यस्मां । अतियुष्मान् । अत्यस्मान् । अतियुष्मया । अत्यस्मया । अतियुष्मयोः । अत्यस्मयोः ॥ युष्मदस्मदोः षष्ठीचतुर्थीद्विती

॥ अत्वे आमसाविति त्वे च अमशसोरित्य लोपः अतित्वां अतिमां शसि अत्वे कृते अमशसोरित्यलोपः शासोरिति दीर्घः शसोनइति नत्वं अतित्वान् अतिमान् २ आत्वे कृते १ औ विभक्तौ तामिच कृते सवर्णे दीर्घः सह ३ अतित्वं अत्यहं अतियुष्मां अत्यस्मां अतियूयं अतिवयं अतियुष्मां अत्यस्मां अतियुष्मा अत्यस्मां अतियुष्मान् अत्य २ स्मान् अतियुष्मया अत्यस्मया अतियुष्मा २ भ्यां अत्यस्माभ्यां अतियुष्माभिः अत्यस्माभिरित्यादि ९

॥ अतित्वं अत्यहं अतियुवां अत्यावां अतियूयं अतिवयं अतियूयं अतिवयं अतियुष्मी अत्यावी अतियुवां अत्यावां अतियुवान्
अत्यावान् अतियुवया अत्यावया अतियुवाभ्यां अत्यावाभ्यां अतियुवाभिः अत्यावाभिः अतितुभ्यं अतिमह्यं अतियुवा-
भ्यां अत्यावाभ्यां अतियुवभ्यं अत्यावभ्यं इत्यादि = षष्ठी चतुर्थी च द्वितीया च षष्ठीचतुर्थीद्वितीयास्ताभिः अत्रस्थस्त्वात्

षष्ठीस्थस्य पूर्वनिपातः २

पाभिस्तेमे वान्नौ वस नसौ । युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयासहितयोर्यथासं-
ख्येन अमी आदेशा भवंति । तत्रैकवचनेन सह तेमे । द्विवचनेन सह वान्नौ । बहुव-
चनेन सह वस्नसौ । त्वामौ मा । अमा सहितयोर्युष्मदस्मदोः त्वा मा इत्येतावादेशौ
भवतः । श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः । स्वामी ते मेपि स हरिः पातु वामपि
नौ विभुः । १ सुखं वान्नौ ददात्वीशः पतिर्वामपि नौ हरिः । सोव्याद्वो नः शिवं वो नो दद्या-
त्सेव्योत्र वः स नः । २ एकवाक्ये युष्मदस्मदादेशाः वक्तव्याः । एकाख्यातं वाक्यं तेने-
ह न । ओदनं पच तव भविष्यति । इह तु स्यादेव शालीनां ते ओदनं दास्यामीति ।
अनन्वादेशे वा । एते वान्नावादय आदेशा अनन्वादेशे वा वक्तव्याः । अन्वादेशस्तु
कथितानुकथितमात्रं । धाता ते भक्तोस्ति । अन्वादेशे नित्यं । तस्मै ते नमः

तस्मै पूर्वोक्ताय ते तुभ्यं विष्णवे नमोस्तु ३

न चादौ । वाक्यादौ पादादौ च वर्त्तमानयोर्युष्मदस्मदोर्नैते । त्वां पातु मां पातु वेदैर
शेषैः संवेद्योस्मान् कृष्णः सर्वदावतु ॥ विशेष्यपूर्वं (संबोधनं) संबोधनेतरपूर्वं संबोधनं

श्लोकस्य चतुर्थांशः पादः
पादं प्राप्य भिन्न्य
स्यादौ एते आदेशा न
भवंति विभक्त्यंतेन
तस्यादौ भवंत्येव १०

किं कृत्वा विशेष्यपूर्वं यस्मात् तत् एतादृशं विशेषणात्मकं संबो-
धनं च पुनः संबोधनेतरं पूर्वं यस्मात् तत् एतादृशं संबोधनेतरपूर्वं
[illegible]

नि० ॥ अन्येपि अव्ययानि संति तथाहि कामं स्वछंदप्रकामयोः स्वशये। सांप्रतमिति न्याय्ये। परमिति किंत्वर्थे। सा कृतादिति प्रत्यक्षे। साचीतीति र्यगर्थे। संवदिति वर्षे। अवश्यमिति [illegible] निश्चये। उषेति रात्रौ। उमित्यंगीकारे ब्रह्मणि च। भूरिति भूमौ। तुवइत्यंतरक्षे। कुरिति कुत्सिते षदर्थयोः। अंजसेति तत्त्वशीघ्रार्थयोः। मिथु इति द्वावित्यर्थे। अस्तमिति विनाशे स्थाने इति चुक्ते। वरक्षिति ईषदुक्ते। सु दीति शुक्लपक्षे। वदीति कृष्णपक्षे। तुमिति तुंकारे। आहे लुवाचे लुर्थे। आसेति वर्भवेत्यर्थे। आर्येति प्रतिषेधे। असीति त्वमित्यर्थे वाक्या

के। पूर्वस्मिन्निति पुरः। पुरस्तात्। अधः। अधस्तात्। उपरि। उपरिष्टात्। परस्मिन्निति प

रेण। परतः। दक्षिणेन। दक्षिणा। दक्षिणतः। उत्तरतः। दक्षिणस्यां दिशि दूरे इति दक्षि

णाहि। आहिप्रत्ययः। दक्षिणा। उत्तराहि। उत्तरा। तदधीनकार्त्स्न्ययोर्वा सात्। राजसात्।

सर्वं भस्मेति भस्मसात्। उरी। ऊरी। उररी। विस्तारांगीकारयोः। सद्यादिः काले निपा

(तत्काल) (तत्काले)
त्यते। समानेऽह्नि सद्यः। अद्य। अधुना। इदानीं। तस्मिन् काले तदा। यदा। कदा। सर्

। सर्वदा। एकदा। अन्यदा। सपदि। सांप्रतं। संप्रति। झटिति। तूर्णं। आशु। शीघ्रं। पूर्व

(अस्मिन् वर्षे पूर्ववर्षे परारि पूर्वतरे अन्यवर्षे)
स्मिन्नह्नि पूर्वेद्युः। परेद्यवि। परेद्युः। अपरेद्युः। ऐषमः। परुत्। परारि। अन्येद्युः। अन्यत

रेद्युः। उभयेद्युः। उभेद्युः। तर्हि। कर्हि। यर्हि। एकर्हि। एतर्हि। प्रादिरुपसर्गः। प्र। परा।

अप। सम्। अनु। अव। निस्। निर्। दुस्। दुर्। अभि। वि। अधि। सु। उद्। नि। प्रति। अति। पर

ि। अपि। उप। आङ्। अंत। अंतर्। आविर्। प्रादुर्। प्राग्धातोः। उपसर्गाः धातोः प्राक् प्र

योक्तव्याः। तदव्ययं। चादिरव्ययसंज्ञं भवति॥ क्त्वाद्यंतं च॥ क्त्वा। क्यप्। तुम्। णम्।

पूर्वकाले क्त्वेति क्त्वा। समासे क्यबिति क्यप्। तुमर्तदर्थायां भविष्यतीति तुम्। पौनःपुन्ये णम् पदं द्विश्चेति णम्। संख्यायाः धे तिधा। वह्वल्पार्थात्कारकात् शस् इति शस्। अभूततद्भावे कृभ्वस्तियोगे नाम्नश्च्विरिति च्विः। वत्तुल्ये इति वत्। क्रियायाः आ वृत्तौ कृत्व इति कृत्वस्। द्वित्रिचतुर्भ्यः सुरिति सुः। [illegible] कर्षेदित्याम् १०

लंकारयोः। कु ईषत् प्रैषानुज्ञा वसरेषु। वामिति पुवार्थे च। हुवाहु एतौ प्रियेवा क्ये एवमन्येपि स्व यथार्थाः ३

तद्धोः धीनं २

एते शेघार्थे ६

प्र आदिर्यस्य सः प्रा दिः तद्गुणसंविज्ञानो यं बहुव्रीहिः उपस मीपे सृज्यते उच्चार्य ते क्रियावाचकस्ये सुपसर्गः कर्मणि घञ् प्रत्ययः संज्ञा वलात् क्रियासंवं ध इति लभ्यते यदुक्तं यत् क्रियायुक्ताः प्रा दयस्तान्प्रत्येवोप सर्गसंज्ञेति ४

क्त्वादिर्यस्यांते त्क्वा ल्यादयः क्त्वोत्वादयः ग्रंते यप्सतत् १

सि॰ चं॰

२८ २९

धा। स्वि। शास्। वत। कृत्वस्। सु। आम्। इत्याद्यंतम् अव्ययसंज्ञं भवति। अव्ययाद्धि भक्तेर्लु
क्। सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययं॥ २ व
ष्टि भागुरिरल्लोपम् अवाप्योरुपसर्गयोः॥ आपं चैव हलंतानां यथा वाचा निशा दिशा॥ ३
अवगाहः। वगाहः। अवतंसः। वतंसः। अपिधानं। पिधानं॥ इत्यव्ययानि॥ ॥ अजाद्यतः
स्त्रियां। अकारांतान्नाम्नः स्त्रियां वर्तमानादाप्प्रत्ययो भवति। सर्वा। माया। अजादेश्च॥
अजा। एडका। अश्वा। चटका। मूषिका। वाला। वत्सा। होडा। मंदा। विलाता। संफला।
भस्त्रफला। अजिनफला। शणफला। पिंडफला। सत्पुष्पा। प्रत्यक्पुष्पा। कांडपुष्पा।
प्रांतपुष्पा। एकपुष्पा। शूद्रा। कोकिला। क्रुंचा। उष्णिहा। देवविशा। ज्येष्ठा। कनिष्ठा।
मध्यमेति। पुंयोगेऽपि। शूद्रा। जातावपि। अमूला। इत्यादि। पादो वा ईप्। द्विपदी। द्वि
पात्। द्विपदा। कात्पूर्वतः। कापि परे पूर्वस्याकारस्य इकारो भवति। कारिका। पाचि
का। अतः किं। गौका। नौका। तपरः किं। राका। क्षिपकादीनां न। क्षिपका। ध्रुव

॥ करोतीति ण्वुल् विति वल् नौ शा छात् चार्थिकः प्रलकाराऽभवितु शक्नोतीति शका पचाद्यच् प्रत्ययः तपरः किं राका। पूर्वस्य किं कटुकारस्य वती अज्ञा
तादौकः मामकनरकयो रताइः ककारस्य प्रत्ययत्वाभावादप्राप्तौ वचनं ममेयं मामिका। अणी नयोरिति ममकादेशः। हित्वा वृद्धिः नरान्का
यतीति कैशाद्दे अन्यादीतोऽड् इति डप्रत्ययः इत्वं च नरिका क्षिपेर्नाम्युपधात्कः। ध्रुवस्थैर्ये इत्यस्माद्धातोः ... स्थैर्ये यो रस्मात्
चाद्यप्रत्ययः कु ... का। भाजनं चटभेद

विभजनं विभक्तिः विभागः यद्वा विभज्यते बोध्यते कर्तृकर्मादयोऽनयेति विभक्तिः स्वादिः ताभ्यो रवेति योगरूढिः २

होडेति भिन्नस्त्री मंदेति प्रौढास्त्री। विलातेति नवयौवनास्त्री। संफलात एकपुष्पांता औषधिविशेषाः ६

ने अस्मा द्वुल् आपू च चटका एव य का २९ स एव स का अ ... ताव्ययसर्वादिरित्य कः अग्रपत्रे प्रयोगाः २

॥निश्चयेन पतंत्यनेकेष्वर्थेषु द्योतकत्वादिति निपातः पत्लृ पतने ऽस्मात् ज्वादेर्णः असत्ववाचि नामेव चादीनां निपातसंज्ञा ऽव्ययसंज्ञा च भवति स्वरादीनां तु सत्ववाचित्वं चाव्ययसंज्ञे व निपातसंज्ञा स्वस्ति वाचयति स्वः पश्यति स्वः पतती त्यादौ कर्मादिकत्वं स्वरादीनां स्यस्वेव एकस्वराणां निपातानां संधिर्भवतीति निपातसंज्ञाफलं एकस्वराणां स्वरादीनां संधिर्भवत्येव तेषां निपातसंज्ञाभावात् चेति समुच्चयान्वाचयेतरेतरयोगसमाहारेषु ॥ ७८ ॥ कारकयोरेनमत्ववाचर

त्वत्को

च हि त्वो ऽन्यस्मात्संबोधनात्परयोर्नैते देवास्मान्पाहि न हरे विभो ऽस्मान्नः कृष्ण सर्व

पंचैव चादियोगा एषां मन्त्रे षि कोरः

दा विशेष्यपूर्वा तु हरे कृपालो नः पाहि सर्वदा कृष्ण देव नः ॥ चादिमिश्र च वा हैवे

ह एव एतैर्योगे नैते आवयोर्युवयोरीशौ वेशो हे शक्त यैवंच अहे शः युवयोरे

व हरिर्मामिव रक्षतु योगे इति किं हरो हरिश्च मे स्वामी अचक्षुष ज्ञानार्थ धातुभि

र्योगे च न चेतसा त्वां समीक्षते भक्तस्तव रूपं ध्यायति चाक्षुषज्ञाने तु भक्तस्त्वा

पश्यति च रूपा विद्यमानपूर्वा प्रथमांतात्परयोरन्वादेशेऽप्येते वा भक्तस्त्वं मेऽपि

ते न हरिस्त्वां त्रायते स मां त्वा मेति वा चादिर्निपातः च वा ह अह एव एवं नूनं

पृथक् शश्वत् युगपत् भूयस् नह हंत विना नाना स्वस्ति अस्ति दोषा वृथा

मृषा नक्तं मिथ्या मिथस् अथ अथो अहो ह्यस् श्वस् उच्चैस् नीचैस् शनैस् ऋ

धक् ऋते आरात् दूरात् दिवा रात्रौ सायं चिरं मनाक् ईषत् जोषं तूष्णीं बहि

स् अवस् समया निकषा अद्धा वत उपधा साम्प्रि सना सनत् सनात् तिरस् अं

सि० चं० नरा। अंतरेण। सहसा। अलं। वषट्। क्षमा। विहायसा। मुधा। पुरा। तुरा। मिथो। प्रायस्। मुहुस्। सा
२६ र्द्धं। साकं। नमस्। हिरुक्। धिक्। मा। माङ्। अम्। आम्। नेत। चेत्। कच्चित्। चण्। नञ्। य
द्वि। सत्यं। जातु। कं। शं। ज़ोकू। र। हसि। अभीक्ष्णं। हा। आः। आत्। वै। है। रे। किं। यत्। तत्। इ
ति। इव। हं। होः। स्वर्। अंतर्। प्रातर्। पुनर्। सनुतर्। स्यात। यावत्। तावत्। स्वाहा। स्वधा
तथा। हि। खलु। किल। नु। ननु। सुष्ठु। दुष्ठु। आदह। उपसर्ग स्वर विभक्ति प्रतिरूकाश्च
॥ अवदत्तं। अहंयुः। हेतौ। स्वयं। उत। नञ्। स्वधा। स्म। अस्मि। वै। शंवट्। नो। दिष्ट्या। अआ
इ ई उ ऊ ऋ ॠ लृ ॡ ए ऐ ओ औ। पशु। शुकं। यथा। कथा। च। पाट्। प्याट्। अंग। हा। हे।
हे। भोः। अयि। द्य। विषुरे। अरे। एकपदे। द्राक्। मंक्षु। युत। आतः। श्रौषट्। वौषट्। श
श्वट्। इत्यादि॥ तत्रादिर्विभक्त्यर्थे निपात्यते॥ तस्मिन्निति तत्र। अस्मिन्निति अत्रे॥
यत्र। कुत्र। क्व। कुह। तेन प्रकारेण। तथा। यथा। सर्वथा। कथं। इत्थं। अस्मादिति इ
तः। एतस्मादिति अतः। ततः। यतः। कुतः। सर्वतः। बहुतः॥ सार्वविभक्तिकास्तसिये २६

॥ उपाधिभ्यामासन्नारूढयोरिति त्यकः उपत्यका अधित्यका उपत्यकाद्रेरासन्ना भूमिरूर्द्धमधित्यका इत्यमरः। तरत्तेर्वुण् अ काढे
शे वृद्धिश्च तारका नक्षत्रे नेत्रकनीनकायां तु तारिका तंतूनां विकारस्तांतवं तस्मिन् वर्णका प्रावारविशेषः वर्ण वर्ण क्रियावि
स्तारवचनेषु इति चौरादिकात् वुण् ग्रंथविशेषस्य व्याख्यात्री त्रकर्त्री चवर्त्तिका वर्त्तयतीति वर्त्तिका वुण् प्रत्ययः शकुनावे
व वाच्ये ऽयं विकल्पः अन्यस्मिन्नर्थे नित्यमित्वं प्राचां पूर्वाचार्याणां मते इतो ऽभावः उदीचामाक्षिका नां इत्यमितरथा। वृंदार

का। चटका। एका। सका। उपत्यका। अधित्यका। तारका ज्योतिषि। अन्यत्र तारि
का। वर्णका। तांतवे। वर्णिकान्या। वर्त्तका। शकुनौ प्राचां। उदीचां तु वर्त्तिका। अष्ट
का आद्वे। अष्टिकान्या। क्षिपका। सूतका। सूतिका। पुत्रका। पुत्रिका। आर्यका
आर्यिका। चटकका। चटकिका। निर्भस्त्रका। निर्भस्त्रिका। वृंदारका। वृंदा
रिका। एषका। एषिका। अजका। अजिका। ज्ञका। ज्ञिका। द्वके। द्विके। निःस्वक
का। निःस्विका। ह्रस्वो वा। कापि परे तरादौ च पूर्वस्य ह्रस्वो वा भवति। गंगका
गंगाका। गंगिका। गंगीका। नदिका। नदीका। श्रेयसितरा। श्रेयसीतरा। वा ब्रह्मण
देवसंघब्रह्मराणां न। गौका। गोका॥ अण् ई पू। दंडिनी। मघोनी। शुनी। कर्त्री। य
स्य लोपः। इ वर्ण अवर्णयोर्लोपो भवति तद्धित स्वरे यकारे ई पि च। चौरी। औ
पगवी। ऐंद्री। ईयंनोल्लोपः। राज्ञी। द्विदाम्नी। ष्ठितः। षकार टकार नकार ऋकारा
रानुबंधात् स्त्रियामीप्प्रत्ययो भवति। षवराकी। टकुरुचरी। उरुद्वयसी। उरुद

यां एवं यका। साएव स
का १
अक्षंतिव्याप्तलणायस्यां
सा ऽष्टका इष्टं ऽभिस्यां
तकः अष्टौ परिमाण
मस्याः संख्यायाइस्य
ष्टका ३

नचआचअणचएषां
समाहारो न्वणतस्मात्
न्वणः ८=

इविपरम्तिअनोअको
रस्यलोपः २
षच स्वच अश्च आचेति
ष्टुरः ष्टुरः इतोयस्मात्
ष्टुत तस्मात् ष्टुतः २

क शब्दः देवतावाची
पुंस्त्वे एवमन्यत्र त्रिलिं
गः। वृंदारकौ रूपमु
ख्याविसमरः १=
द्विवेर्बा वसुरित्तिपचेः शा
त्प्रत्यानौ स्तिपूतेवदीतिश
त्प्रत्ययः पचतीति द्विवैः
शात्प्रत्यये दिवादैर्यः अ
प्रयोग नित्यं इति नुम्
तुदेः शात्प्रत्ययः। तुदादेः
रइत्यप्रत्ययः मन्नंतान्ना
म्न ईप् नसीमादामाराजव
त् सीमा गंगावत्। सीमसी
मेत्रु मे स्त्रियामित्यमरः २
तरतमै स्त्विष्टाः प्रकर्षेण
इति प्रत्ययः स्त्रियां विहि
तस्येति किं लक्ष्मीतराच
मूतरा ७=

घ४

अस्ते दीव्यतीति आ-
ह्निकी इति कप्रत्ययः
८

१६० चै०

मन् अंते यस्य सः मन्नंतः
तस्मात् ३
३०

बहवो राजानो यस्यां
सा बहुराज्ञी ५

न अंत्य अनंत्य अनंत्यं
वयः अनंत्यवयः
अनंत्यवयः वक्ति तत्
शीलं अनंत्यवयोवा-
ची तस्मात् ३

घ्नी। उरुमात्री। आह्निकी। इत्वरी। उगोमती। विदुषी। रूपचंती। प्राची। प्रांची। प्रती-
ची। प्रत्यंची। उदीची। उदंची। तिरश्ची। तिर्यंची। रूपचंती। दीव्यंती। उदती। तुदं-
ती। मन्नंतान्नेप्। सीमा। सीमानौ। दामा। दामानौ। अन्नंताद्बहुव्रीहेर्नी। बहुयज्वा।
बहुयज्वानौ। डापूर्वा। सीमा। सीमे। दामा। दामे। बहुयज्वा। बहुयज्वे। उपधाल्लोपि-
नो बहुव्रीहेर्वेप्। बहुराज्ञी। बहुराजा। बहुराजे। पक्षे डावीपोरभावः। बहुराजा। बहुरा-
जानौ। बहुराजानः। नदादेरदंतात्स्त्रियामीप्। नदी। गौरी। सौपर्णेयी। आह्निकी।
स्त्रैणी। पौंस्नी। शाक्तिकी। यांशिकी। अश्विभ्वी। अनडुाही। अनडुही। गार्गी। गार्ग्या-
यणी। लोहित्यायनी। कौरव्यायणी। मांडुकायनी। आसुरायणी। इत्यादि। अनं-
त्यवयोवाचिनोऽदंतात्स्त्रियामीप्। कुमारी। किशोरी। वधूटी। चिरंटी। तरुणी।
तलुनी। कलभी। अदंतात्किं। शिशुः। अनंत्येति किं। वृद्धा। स्थविरा। कन्यायाः नं क-
न्या। ऊधोंतस्य बहुव्रीहेर्नेङ् स्त्रियां। कुंडोध्नी। घटोध्नी। अनूध्नी। वयोवाचिनो हाय

बहवो यज्वानो यस्यां
सा बहुयज्वा नगरी नां
तत्वाद् पूर्वाद्धः [illegible]
वतिधे

अन् अंते यस्य सः अन्नंतः
तस्मात् ३

कुंडवत् ३० ऊधो
यस्याः सा घटवत् ऊधः
यस्याः सा घटोध्नी इत्यादि
[illegible]
ध्नी २

त्रयः हायनाः यस्याः सा चत्वारः हायना यस्याः

नस्वेयं त्रिचतुर्भ्यां णत्वं । त्रिहायणी । चतुर्हायणी । द्विहायनी । त्रिचतुर्भ्यां किं । अष्टहायनो

चत्वारः हा- य नाः यस्याः सा

वयोवाचिनः किं । चतुर्हायना शाला । इंद्रादेरानीप् स्त्रियां पुंयोगे । इंद्राणी । ब्रह्माणी । इंद्रस्य स्त्री

वरुणानी । भवानी । सर्वाणी । रुद्राणी । मृडानी । आचार्यादणत्वं । आचार्याणी । हिमा

ऽऽनीप् महारण्य

रण्ययोर्महत्वे । महद्धिमं हिमानी । अरण्यानी । यवाद्दोषे । दुष्टो यवो यवानी । यवना

ऽऽनीप्

ल्लिप्याम् । यवनानी । मातुलोपाध्यायाभ्यां वा । मातुलानी । मातुली । उपाध्यायानी । उपा

ध्यायी । पुंयोगे चादंतात्स्त्रियामीप् । शूद्री । गणकी । पालकांतान्न । गोपालिका । अश्व

पालिका । सूर्याद्देवतायां माप् । सूर्यस्त्री देवता सूर्या । अन्या सूरी । जातेरयोपधात् ।।

जातिवाचिनो यकारोपधादकारांतात्स्त्रियामीप्रत्ययो भवति । महिषी । हंसी । योपधात्तु जातेरिति किं म्सुराऽ४

क्षत्रिया । वैश्या । क्वचिन्न । बलाका । गवयहयमुकयमनुष्यमत्स्यानामनिषेधः । गवयी ।

हयी । मुकयी । हलस्तद्धितयस्येपि लोपः । मनुषी । ईपि मत्स्यस्य यलोपः । मत्सी । सूर्यागस्त्य

योरीये ईपि च । सूरी । आगस्ती । तिष्यपुष्ययोर्नक्षत्राणि यलोपः । तैषी । पौषी । जानप

।। पाणिनिसूत्रं । जानपदकुंडगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्राऽवपनाकृत्रिमाश्राणा ।

स्थौल्यवर्णानाऽच्छादनाऽयोविकारमैथुनेच्छाकेशवेशेषु एभ्य एकादशभ्य एषु अर्थेषु ईप् स्यात् जानपदीवृ

त्तौ ।।श ।

। ईप्समाहारे त्र्यं । हयी । त्रयी । अध्य । क्षत्रियोपाध्याये । श्रौवाचार्यं । वरुणानी । आर्यार्णी । क्षत्रियाणी । क्षत्रिया । उपाध्यायानी । उपाध्याया । ४६

सि० चं०

३१

पढे नीलोर

पात्रे१स्थापनेर्थे

दीर्घत्तिश्चेतत्रानिपदान्या। कुंडी। अमत्रे चेत्कुंडाअन्या। गोणी आवपने। अन्यागोणा। स्थ
लीअकृत्रिमायां। अन्यास्थला। भाजीश्राणाचेत्। नागीस्थूलाचेत्। अन्यानागा। का१
लीवर्णश्चेत्। अन्याकाला। नीली अनौषधीप्राणिनोः संज्ञायांवा। [illegible]। [illegible]। कुशी
अयोविकारे। कुशान्या। कामुकीमैथुनेछायां। अन्याकामुका। कबरीकेशविन्यासे
अन्याकबरा। शोणाद्वा। शोणी। शोणा। बहुव्रीहेर्श्चांतिपूर्वपदात्क्तांतादीप्। ऊरुभिं
न्नी। जातांतान्न। दंतजाता। अस्वांगपूर्वपदाद्वा। पूर्वेणनित्येप्राप्तेविकल्पार्थमेतत्। सु
रापीती। सुरापीता। पाणिंग्रहीतीभार्यायां॥ पाणिग्रहीतांन्या॥ क्रीतांतात्करणादेः। व
स्त्रक्रीती। क्वचिन्नधनक्रीती। क्तादल्पत्वे। अभ्रलिप्तीद्यौः। अल्पत्वेसतिकिं। चंदनलि
प्तान्या। स्वांगाद्वा। स्वांगवाचिनोऽदंतादसंयोगोपधादुपसर्जनाद्वास्त्रियामीप्। सुमु
खी। सुमुखा। सुकेशी। सुकेशा। संयोगोपधात्तु। सुगुल्फा। उपसर्जनात्किं शोभनाशिखासु
शिखा। स्वांगंत्रिधा। अद्रवंमूर्त्तिमत्स्वांगंप्राणिस्थमविकारजं॥ अतत्स्थंतत्रदृष्टंचतेन

गुरुसिन्धेपस्यामा गुरुसिन्नी४

३१

चेत्तत्तथायुतं । २ । सुस्वेदाद्द्रवत्वात् सुस्नाना । अमूर्त्तत्वात् सुमुखा शाला । अप्राणिस्थत्वा
त् सुशोफा विकारजत्वात् । अतत्स्थं दृष्टं च सुकेशी सुकेशा वा रथ्या । अप्राणिस्थस्यापि
प्राणिनि दृष्टत्वात् तेन चेत्तत्तथायुतं । सुस्तनी सुस्तना वा प्रतिमा प्राणिवत्प्राणिसदृशेष्वि
त्वात् । नासिकोदरोष्ठजंघादंतकर्णशृंगाच्चेषु । तुंगनासिकी तुंगनासिका । मंदोदरी ।
मंदोदरा । बिंबोष्ठी । बिंबोष्ठा । सुजंघी सुजंघा । सुदंती । सुकर्णी । चारुकर्णी । सुशृंगी । अंग
गात्रकंठपुच्छाद्वाईषु । स्वंगी । सुगात्री । सुकंठी । सुपुच्छी । पक्षे स्वंगेत्यादि । कवरमणिवि
षशरेभ्यः परात्पुच्छान्नित्यं । कवरपुच्छी । मणिपुच्छी । विषपुच्छी । शरपुच्छी । उपमानात् ।
पक्षपुच्छाभ्यां । श्येनपक्षी । श्येनपुच्छी । [illegible] नक्रोडादिबहुस्वरात् ।
कल्याणक्रोडा । सुजघना । सहनञ्विद्यमानपूर्वान्न । सकेशा । अकेशा । विद्यमा॰
न नासिका । नखमुखात्संज्ञायां । शूर्पणखा । गौरमुखा । संज्ञायां किं । ताम्रमुखी । क॰
न्या । वोर्गुणात् । उदं ताद्गुणवाचिनो वा स्त्रियामीप् । पट्वी । पटुः । वह्वी । बहुः । मृद्वी म

सि० चं०
३२

डुः। तन्वी तनुः। गुर्वी गुरुः। खरुसंयोगोपधान्न। खरुः। पांडुः। कृदिकारादक्तिन्नर्थात्ई
र्वा। रात्रिः रात्री। अंगुलिः अंगुली। आजिः आजी। धूलिः धूली। शकटिः शकटी।
अक्तिन्नर्थात्किं। कृतिः। भूतिः। मतिः। अजननिः। पद्धत्यादिभ्यो वा। पद्धतिः पद्धती। ए
च मन्वादेः॥ मनुपूतक्रतुवृषाकप्यग्निकुसितकुसिदानामै आदेश ई प्रत्ययश्च स्त्रियां
पुंयोगे। पूतक्रतायी। कुसितायी। कुसिदायी। वृषाकपायी। अग्नायी॥ मनोरैसौ
वा। मनायी। मनावी। मनुः। पत्न्यादयो निपात्याः। पतिशब्दस्य नकारादेशः यज्ञेन
संबंधे वशिष्ठस्य। नित्यं सपत्न्यादिषु। पत्नी। सपत्नी। एकपत्नी। वीरपत्नी। सखी
अशिश्वी। अनडुाही। अनडुही। प्राची। प्रांची। प्रतीची। प्रत्यंची। उदीची। अवाची
क्वचिद्वा। दृढपतिः। दृढपत्नी। वृषलपतिः। वृषलपत्नी। वर्णवाचिनोऽनुदात्तां
तान्तोपधादनुपसर्जनादीबा तो न। एता एनी। हरिता हरिणी। रोहिता रोहिणी।
श्येता। श्येनी। असिता। छंदसि क्नमेके। असिक्नी। पलिता। पलिक्नी। इत्यादि। इतोम

३२

नुष्यजातेरीप्। दाक्षी। अवंती। कुंती। ऊतः। उदंताद्योपधान्मनुष्यजातिवाचिनः स्त्रि
यामूङ्प्रत्ययः। कुरूः। अयोपधात्किं। अध्वर्युः स्त्री। पंगोश्च। पंगूः। श्वशुरस्योकारा
कारलोपश्च। श्वश्रूः। उपमानवाचिपूर्वपदादूरूत्तरपदादूः। करभो
रूः। संहितशफलक्षणवामसहितसहादेरनौपम्येपि। संहितोरूः। शफोरूः। लक्षणो
रूः। वामोरूः। सहितोरूः। सहोरूः। ॥इति स्त्रीप्रत्ययः॥ ॥लिंगार्थे प्रथमा॥
नामार्थमात्रे लिंगाधिक्ये च प्रथमा विभक्तिर्भवति॥ नियतोपस्थितिको नामार्थः॥
उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानं। वारी। द्रोणः। आढकं। एकः। द्वौ। बहवः। अलिंगा
नियतलिंगाश्च नामार्थमात्रेस्योदाहरणम्। अनियतलिंगात्तु लिंगमात्राधिक्य
स्यस्य च। तटः। तटी। तटं। आमंत्रणे च। अभिमुखीकरणे प्रथमा। हे देव। हे देवौ। हे
देवाः। भोसः। भोस्भगोस्अघोस्भवत्भगवत्अघवतां वा निपात्या धौ। भो हरे। भर
शिष्यं ते इति शेषः
गो नमस्ते। अघो याहि। शेषाः कार्यकर्तृसाधनयोर्दानपात्रे विशेषावधौ संबंधाधा

सहेतेइति सहो सक्थावू
रूयस्याः ५

। नृनरयोरीप्वृद्धि
श्च। नारी। यूनस्तिः।
युवन्शब्दात्स्त्रियां
तिः। युवतिः। ५॥

आमंत्रणमाभिमुखीकर
णमनुकूलकरणमिति
यावत् आमंत्र्यते प्रस
न्नः क्रियतेऽनेनेति सा
धनेषु २३

पंगुशब्दो गुणवा
ची॥२॥

लिंगं चार्थश्च लिंगा
र्थौ तस्मिन् लिंगार्थे लिंगेऽ
र्थे च प्रथमा इत्यर्थः ५

क्रियाकरोति सः
कर्त्ता धातूपात्त
व्यापाराश्रय इत्यर्थः

स्तावधयोः । द्वितीयाद्या विभक्तयः एष्वर्थेषु भवंति । कार्ये कर्म्मकारके द्वितीया । कटं
करोति कारुको रूपं पश्यति चाक्षुषः । राज्यं प्राप्नोति धर्म्मिष्ठः सोमं सुनोति सोमसु
पाः ॥१॥ कर्त्तरि करणे च तृतीया ॥ भिन्नः शरेण रामेण रावणो लोकरावणः ॥ दानपा
त्रे चतुर्थी । वेदविदे गां ददाति । क्रियया यमाप्नोति तत्रापि चतुर्थी पत्ये शेते । दानपा
त्रे किं । राज्ञः करं ददाति । विश्लेषो विभागस्तस्यावधौ पंचमी । हिमवतोऽवतरति गं
गा । धावतोऽश्वात्पतति । संबंधे षष्ठी । राज्ञः पुरुषः ॥ आधारे सप्तमी ॥ औपश्लेषिकः
सामीपिको ऽभिव्यापको वैषयिको नैमित्तिक औपचारिकश्चेति षड्विधः । कटे
शेते कुमारो सौवटे गावः सुशेरते ॥ तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परं । युद्धे स
न्नह्यते धीरोंऽगुल्यग्रे करिणां शतं ॥२॥ क्रियालक्षणं भावस्तत्रापि सप्तमी । वर्षति
देवे चौरश्चायातः । गोषु दुह्यमानासु गतः । विनासहनमस्कृते निर्द्धारणस्वाम्यादिभिश्च
॥ एतैर्योगे द्वितीयाद्या विभक्तयः । विनादियोगे द्वितीया । विना पापं सर्वं फलति । ग्रं

उपश्लेषः संयोगः
विगतः श्लेषो विश्लेषः
विभागः तस्य अवधी
यते एकरूपतया ज्ञाय
ते सोऽवधिस्तस्मिन् ५

समीपे भवः सामीपिकः
तस्मिन् केनेऽति ७ अ
भितः सर्वतः आप्नोतेऽ
भिव्यापकः । विषयः
प्रकाशनसामर्थ्यं त
त्स्यास्तीति वैषयि
कः । निमित्तं हेतुः त
त्र भवः नैमित्ति
कः । उपचारस्तत्र
भवः औपचारिकः
७

अनुक्ते संप्रदा
ने किं दानीयो
विप्रः दीयतेऽस्मा
यिति दानीयः सं
प्रदाने अनीयप्रत्य
यः ।८॥ आश्रियते
कर्त्तृकर्म्मद्वारा क्रिया
ऽस्मिन्नित्याधारस्तस्मि
न् ६ उपश्लेषः श्लेषः
संयोगः सोऽस्यास्तीति अ
ऽकौ शिलेवेति ६

३३

तरेणहरिंणीकिंजीवितेन। अंतरात्वांमांहरिः। जपमनुप्रावर्षत। उपहरिंसुराः। नदी
मन्ववसितासेना। अतिदेवान्कृष्णः। अभिसर्वतसोःकार्याधिगुपर्यादिषुत्रिषु॥
द्वितीयाम्रेडितांतेषुततोऽन्यत्रापिदृश्यते॥ अभितोग्रामं। सर्वतोनगरम्। धिग्जाल्
मं। उपर्युपरिपर्वतं। अधधिसुखं। अधोअधोग्रामं। उभयतोगोपाः। उभयतः
कृष्णं। परिअनुवाहरिमसि एवंपरितः। समयानिकषाहाप्रतियोगेपि। कालाध्व
नोर्नैरंतर्ये। मासमधीते। क्रोशंपर्वतः। मासंगुडधानाः। मासंकल्याणी। क्रोशम
धीते। क्रोशंकुटिलानदी। नैरंतर्येकिं। मासस्यद्विरधीते। क्रोशस्यैकदेशेपर्व
तः। कृष्णंपरिअनुवाहरिमसि। अधिपूर्वाणांशीङ्स्थासामाधारःकर्म। अभिनि
विपूर्वस्यविशेः। उपान्वध्याङ्पूर्वस्यवसः। अधिशेते। अधितिष्ठति। अध्यास्तेवा
वैकुंठंहरिः। अभिनिविशतेसन्मार्गं। क्वचिन्नपापेभिनिवेशः। उपवसति। अनुव
सति। अधिवसति। आवसति। वावैकुंठंहरिः। नाभुक्त्यर्थस्य। वनेउपवसति। इत्या

ग्रामस्यपार्श्वद्वये
इत्यर्थः।३।

कालश्चअध्वाचका
लाध्वनौतयोर्निर
न्तरंयस्मात्तन्निरं
तरंतस्यभावोनैरंतर्यंत
स्मिन्क्रियागुणद्र
व्यैःकालाध्वनोःनै
रंतर्यंतंवंधेकाला
ध्वभ्यांद्वितीया५

सि॰ चं॰

३६

दिवः कर्मणश्च क
र्मसंज्ञा वा स्यात् अ
क्षैरक्षान्वा दीव्य
ति ५

अनुवाकोऽध्यवि
भागः ६

दि । सहादियोगे तृतीया । सह शिष्येण आगतो गुरुः । एवं साकं सार्द्धं समं योगेपि । येनांगवि
कारः । येनांगेन विकृतेनांगिनो विकारो लक्ष्यते ततस्तृतीया । अक्ष्णा काणः । अंगविं
कारः किं । अक्षि काणं । किंचित्प्रकारं प्राप्तस्य लक्षणे । जटाभिस्तापसः । प्रकृत्यादिभ्यं
श्च । प्रकृत्या चारुः । प्रायेण याज्ञिकः । गोत्रेण गार्ग्यः । समेनैति । विषमेणैति । द्विद्रोणेन
धान्यं क्रीणाति । सुखेन दुःखेन याति । तुलोपमावर्ज्जे तुल्यार्थयोगे तृतीयाषष्ठ्यौ ।।
कृष्णस्य तुल्यः कृष्णेन तुल्यः । रामस्य सदृशः रामेण सदृशः । अनिरुद्धः । तुलोपमा
वर्ज्जेति किं । कृष्णस्य तुला उपमा वा नास्ति । फलप्राप्तौ कालाध्वनोरत्यंतयोगे तृती
या । अह्ना क्रोशेन वा नुवाकोऽधीतः फलप्राप्तौ किं । मासमधीतः किंचित्नायातः ।
निषिद्धाचारप्रतिपाद्ये दाणः प्रयोगे चतुर्थ्यर्थे तृतीया दास्या संयच्छते कामी धर्म्मे तु भा
र्यायै संयच्छते इत्यादि । नमःस्वस्त्यादियोगे चतुर्थी । उपपदविभक्तेः कारकविभक्तिर्बलीय
सी । नमस्करोति देवान् । प्रभ्वादियोगे षष्ठ्यपि । अपिग्रहणाच्चतुर्थी । भोजनाय । भोजन

नमो नारायणाय १
वं स्वस्तिस्वाहास्वधा
लं वषड्योगे चतुर्थी
२

३६

स्वाप्रभुः समर्थः शक्तः। कृष्णाय कृष्णस्य वा भद्रं भद्रं कुशलं सुखमायुष्यमर्थं प्रयोजनं
वा भूयात्। रुच्यर्थधातुप्रयोगे प्रीयमाणो। हरये रोचते भक्तिः। श्लाघह्नुङ्स्थाशपां प्रयोगे बो
धयितुमिष्टे। गोपी स्मरात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा धारेरुत्तमर्णे। भक्ताय धार
यति मोक्षं हरिः। स्पृहेरीप्सिते। पुष्पेभ्यः स्पृहयति। ईप्सिते किं। पुष्पेभ्यः। वने स्पृहयत
ति वायुः। क्रुधद्रुहेर्ष्यासूयार्थानां प्रयोगे चतुर्थी। यं प्रति कोपादयस्तत्र। हरये क्रुध्यति
द्रुह्यति ईर्ष्यति असूयति वा। यं प्रति कोप इति किं। भार्यामीर्ष्यति। इत्यादि। चतुर्थी तदर्था
र्थबलिहितसुखरक्षितैः। यूपाय दारुः। द्विजायायं द्विजार्थः सूपः इत्यर्थः। कुबेराय ब
लिः। गोभ्यो हितं सुखं। ब्राह्मणाय रक्षितं। ऋतेऽन्यादियोगे पंचमी। ऋते ज्ञानान्न मुक्
तिः। अन्यो महाद्धिहारः। आरात् वनात्। इतरो रामात्। भिन्नः कृष्णात् पूर्वो ग्रामात्। प्रा
ग्ग्रामात्। दक्षिणा ग्रामात्। विना कृष्णात्। पृथक् नाना वा। उपाध्यायादधीते ब्राह्मणः
प्रजाः प्रजायन्ते। वनात् ग्रामो योजने। कार्त्तिक्या आग्रहायणी मासे। अपहरेः परिहरेः सं

सि० चं०

३५ सारः। वर्जनार्थयोरपपर्योगे पंचमी। आमुक्तेः संसारः। प्रतिः प्रतिनिधिप्रतिदानयोः
प्रद्युम्नः कृष्णात्प्रति। तिलेभ्यः प्रतियच्छति माषान्। भयहेतौ पंचमी भयभीतभीति
भिरपियोगे चौराद्बिभेति त्रस्यति वा वृकेभ्यो भयभीत इत्यादि। हेतौ तृतीयापंचम्यौ
जाड्यात्। जाड्येन वा बद्धः। स्तोकान्मुक्तः। दूरांतिकयोः षष्ठ्यपि। ग्रामस्य दूरात्। अंत्यक
ात् ग्रामाद्वा इत्यादि। क्रियागुणजातिसंज्ञाभिः। समुदायात् पृथक्करणं निर्धारणे यतस्ततः
षष्ठीसप्तम्यौ। क्रियापराणां क्रियापरेषु वा भगवदाराधकः श्रेष्ठः। गवां गोषु वा कृ
ष्णा गौः संपन्नक्षीरा। नृणां नृषु वा ब्राह्मणः श्रेष्ठः। छात्राणां छात्रेषु वा मैत्रः पटुः। स्वा
म्यादियोगे षष्ठीसप्तम्यौ। गवां गोषु वा स्वामी। अधिपति ईश्वरः दायादः प्रसूतः प्र
तिभूर्वा। अनादराधिक्ये क्रियालक्षणे षष्ठीसप्तम्यौ। रुदति रुदतो वा प्राव्राजी
त्। आयुक्तकुशलाभ्यां योगे षष्ठीसप्तम्यौ तात्पर्ये। आयुक्तः कुशलो वा हरिपू
जने हरिपूजनस्य वा। साधुनिपुणाभ्यां पूजायां सप्तमी। मातरि साधुर्निपुणो वा ३५

प्रसितोत्सुकाभ्यां योगे तृतीयासप्तम्यौ। प्रसित उत्सुको वा हरिणा हरौ वा। साध्वसाधुप्र
योगे सप्तमी। साधुः कृष्णो मातरि। असाधुर्मातुले। निमित्तात् कर्म्मयोगे सप्तमी। चर्म्मणि
द्वीपिनं हंति दंतयोर्हंति कुंजरं। केशेषु चमरीं हंति सीम्नि पुष्कलको हतः। १। क्तस्येन्नंतस्य
कर्म्मणि। [स सप्तमी] अधीती व्याकरणे। तादर्थ्ये चतुर्थी। संयमाय श्रुतं धत्ते नरो धर्म्माय संयमं
धर्म्मं मोक्षाय मेधावी धनं दानाय मुक्तये। २। तुमोः प्रयुक्तस्य कर्म्मणि चतुर्थी। फलेभ्यो
याति। क्यप्लोपे कर्म्मण्याधारे पंचमी। हर्म्यात् प्रेक्षते। हर्म्यमारुह्य प्रेक्षते। आसनात् प्रे
क्षते। आसनमुपविश्य प्रेक्षते इत्यर्थः। इत्याधारः। कर्तृकार्ययोः क्तादौ कृति षष्ठी।
कर्त्तरि कार्ये च षष्ठी क्तादिवर्ज्जिते कृति प्रयुज्यमाने। कृष्णस्य कृतिः। जगतः कर्त्ता कृ
ष्णः। गुणकर्म्मणि वा। नेताश्वस्य ग्रामं ग्रामस्य वा। उभयप्राप्तौ कृति कर्त्तरि षष्ठी न। आ
श्चर्यो गवां दोहोऽगोपेन। स्त्रीप्रत्यययोरकाकारयोर्योगे नोक्तं। भेदिका बिभित्सा वा
रुद्रस्य जगतः। शेषे कृति वा। शब्दानामनुशासनमाचार्येणाचार्यस्य वा। वर्त्तमाना

सि० चं०

३६

धारार्थकस्य योगे षष्ठी। राज्ञां मतः बुद्धः पूजितो वा। इदमेषां शयितमासितं भुक्तं वा। का
शीतु। कुर्वन्। कुर्वाणः। चकृवान्। चक्राणः। चक्रिर्वा सुखं हरिः। हारं दिदृक्षुः। अलं
करिष्णुर्वा। दैत्यान् घातुको हरिः। जगत्सृष्ट्वा सुखं कर्तुं। विष्णुना हता दैत्याः। दैत्यान्
हतवान् हरिः। ईषत्करः प्रपंचो हरिणा। सोमं पचमानः। आत्मानं मंडयमानः। वेदम
धीयन्। कर्ता लोकान्। द्विषः शत्रुर्वा। मुरस्य मुरं वा द्विषन्। न विष्यस्य कस्य न वष्य
दा धर्मण्यार्थस्येन स्त्रयोगे षष्ठीन॥ सतः पालकोऽवतरति। व्रजं गामी। शतं दायी।
कृत्यानां कर्तरि वा। मया मम वा सेव्यो हरिः। उभयप्राप्तौ कृत्ये षष्ठी न। नेतव्या व्रजं गावः
कृष्णेन। दूरान्तिकार्थयोगे षष्ठी पंचम्यौ। दूरं निकटं वा ग्रामस्य ग्रामाद्वा। घृतार्थस्य कर
पविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी। शतस्य दीव्यति। वोपसर्गो। शतस्य
शतं वा प्रतिदीव्यति। षष्ठी हेतुप्रयोगे। अन्नस्य हेतोर्वसति। सर्वादेर्हेतुप्रयोगे हेतौ यो
ते च तृतीया षष्ठ्यौ। केन हेतुना वसति कस्य हेतोर्वा। निमित्तपर्यायप्रयोगे सर्वावि ३६

समासेपू… नि
द्दिष्टपूर्वप्र… र्ज्ज

माधनाआरयोपु द२
पच्यतेऽनेनेति। दीय
तेऽस्मै इति। उपसमीपं
गत्वाधीयतेऽस्मादिति
पच्यतेऽस्यामिति। प्रा
प्त आनंदो यं सः।
ऊढो रथो येन सः।
उपहृतः पशुर्यस्मै
सः। उद्धृतमन्नं यस्मा
त्। पीतमंबरं यस्य
सः। वीरांपुरुषाय…
स्मिन्सः। कुंकुमेन
रक्तं। मथुरायां आ
गतः। धनं विद्यते
यस्य सः। हस्ति विद्यते
यस्यासौ। ६।

॥ …व्ययप्रातिपदिकसंज्ञं। अव्ययं विभक्तिसमीपसमृद्धिवृद्ध्यर्थाभावात्ययासंप्रति शब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसं
पत्तिसाकल्यान्तवचनेषु विभक्त्यादिष्वर्थेषु विद्यमानमव्ययं अन्वये सति नाम्ना सह समस्यते अनव्ययमव्ययं भवतीति अव्ययीभावः
अस्तत्राविरति स्त्रिः। अचलादेर्त्तः विभक्त्यर्थे अव्यये यथा स्त्रियामधिस्त्रि लौकिकविग्रहवाक्यमिदं सप्तम्यर्थस्य द्योतकोऽधिस्त्रि ङि अधिस्त्रिङ् अलौकिकवा
क्यं। अत्र निपातेनोक्तेऽप्यधिकरणे। समासविधानसामर्थ्यात् सप्तमी अन्ये तु स्त्रियमधिकृत्य या आख्यातं तदसत् अधिहरि इत्यत्राधिकृत्येत्यस्यार्थस्याप्रतीतेः क्रमा

भक्त्या यो सर्वोद्दिष्टः तीर्थादयः। को हेतुः। किं प्रयोजनं। कं हेतुं। केन हेतुना। ज्ञानेन निमित्ते
न हरिः सेव्यः। ज्ञानाय निमित्ताय। अन्योक्ते प्रथमा। आख्यातकृत्समासतद्धितनिपा
तोक्ते कारके संबंधे च प्रथमा स्यात्। घटः क्रियते। हरिः करोति। कृष्णः कंसं हतवा
न्। कृष्णेन कंसो हतः। पचनोऽग्निः। दानीयो विप्रः। उपाध्यायः। पचनी स्थाली। प्राप्तानं
दः। ऊढरथः। उपहृतपशुः। उद्धृतौदनः। पीताम्बरः। वीरपुरुषः। कौंकुमं। वाधकरः।।
माथुरः। धनवान्। हस्तहस्ती। विष… दृष्टोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतं। क्रमादमुं
नारद इत्यबोधि सः।। इति कारकप्र०।। समासश्चान्वये नाम्नां। नाम्नामन्वये स
ति समासो भवति। चकारात् कृत्तद्धितधातुसंज्ञाप्रयोजकप्रत्यया अपि। समासप्रत्यय
योः। समासे वर्त्तमानाया विभक्तेः प्रत्यये च परे लुक्। पूर्वेऽव्ययेऽव्ययीभावः। अव्यये पूर्व
पदे सति योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति।। स नपुंसकं।। अव्ययीभावो न
पुंसकलिंगो भवति। नपुंसकस्येति ह्रस्वः। नामत्वात् स्यादिः। अव्ययीभावाद्विभक्तेर्लुक्

योऽस्मदादीनामप
राधानपि दृष्ट्वा तिम
द्दृष्टवानि ।२।
दमुं नारद इत्यबोधि
स इत्यादौ समासो नाद
त्तिनः स्वप्रकृतिरूपाम
श्रीकृष्णेन कर्मीले मात्रा
नभिधायकत्वात् ।७।

समीपार्थे अव्ययं १ यथा कुंभस्य समीपमिति।२।

ऋद्धेराधिक्यं सम-
ृद्धिः मद्राणां समृद्धेः
विशेषाणां समृद्धिः
सुमद्रं॥४॥ संप्रतिः
त्यव्ययमिदानीमित्य
र्थे युज्यते नातत्रैवे
नञ्समासः सोऽत्रोवो
ध्यः असंप्रत्यर्थे यथा
५
साकल्ये यथायोगप
द्ये यथा चक्रेण युग
पत् समकालमिति स
हादेरित्यनेन सहस्य
सः॥४॥ पुनः सादृश्य
ग्रहणं गुणभूतेऽपि सा
दृश्ये यथा स्यादित्यर्थः
सदृशः सख्या॥४॥

अधिस्त्रि। अतोमनतः। अदंताद् अव्ययीभावात् विभक्तेर्न लुक्। अतं वर्ज्जयित्वाँमादेशः।
कुंभस्य समीपमुपकुंभं। वाँ टाङ्योः। अदंताद् अव्ययीभावात् टाङ्योर् अम्वा। उपकुंभं। उपकुं-
भेन वा कृतं। उपकुंभं। उपकुंभे वा निधेहि। अनतः किं। उपकुंभात्। मद्राणां समृद्धिः
सुमद्रं। यवनानां ऋद्धिर्दुर्यवनं। मक्षिकाणामभावो निर्मक्षिकम्। हिमस्यात्ययोऽति-
हिमं। निद्रा संप्रति न युज्यते इत्यतिनिद्रं। हरिशब्दस्य प्रकाश इति हरि। विष्णोः पश्चादनु-
विष्णु। यथार्थे। रूपस्य योग्यमनुरूपं। अर्थमर्थं प्रति प्रत्यर्थं। शक्तिमनतिक्र-
म्य यथाशक्ति। हरेः सादृश्यं सहरि। सहादेः सादिरिति सहस्य सः। ज्येष्ठस्यानुपूर्व्येणेत्य-
नुज्येष्ठं। चक्रेण युगपत् सचक्रं। सदृशः सख्या ससखि। क्षत्राणां संपत्तिः सक्षत्रं। तृण-
मप्यपरित्यज्य सतृणमत्ति। अग्निग्रंथपर्यंतमधीते साग्नि। यथाऽसादृश्ये। य-
